**अञ्जसा** *adv.* ( instr. of अञ्जस् ) 1 Straight on. -2 Truly, correctly, accurately, properly, justly; साक्षाद् दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा Ku. 6. 22 we do not know you rightly or correctly; विद्म हे शठ पलायनच्छलान्यञ्जसा R. 19. 31, न हि कश्चित्प्रियः स्त्रीणामञ्जसा Subhāṣita ; सर्वमेवाञ्जसा वद Ms. 8. 101. -3 Directly ( साक्षात् ), -4 Soon, quickly, instantly; स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतम् Ms. 2. 244. ...अञ्जसा तत्त्वतूर्णयोः । Nm. वशमानितुमञ्जसा । Śiva. B. 25. 1. **-Comp. -अयन** *a.* going straight on. **-कृत** *a.* [ तृ. अलुक् ] done rightly or justly.

**अञ्जसीन** *a.* [ अञ्जस्-ख ] Ved. Straight forward, going straight on. स्तुतिं विन्दत्यञ्जसीनाम् Rv. 10. 32. 7.

**अञ्जि** *a.* Ved. [ अञ्ज्-इन् ] Unctuous, slimy; lubricated, shining, brilliant. **-ञ्जिः** 1 A mark made with sandal &c. a Tilaka mark; रोहिताञ्जिरनड्वान् Yaj. ( रक्ततिलक ). -2 A commander, sender &c. **-ञ्जिः -ञ्जी** *f.* 1 An ointment, pigment. -2 Colour, hue. -3 The sexual organ ( ? ). **-Comp. -सक्थ** *a.* having coloured thighs.

**अञ्जिकः** N. of the son of Yadu.

**अञ्जिव** *a.* Slippery, smooth ( ? )

**अञ्जिष्टः-ष्णुः** [ अनक्ति स्वकिरणैः विश्वम्; अञ्ज्-इष्ठच्-इष्णुच् Un. 4. 2 ] The sun.

**अञ्जिहिषा** ( Desid. of अंह् 1 P. ) Desire of going; Bk.

**अक्त** *pp.* Smeared over, bedaubed, anointed &c.; mostly as latter part of compouds; घृत°, तैल°, शोणित° &c. **-क्ता** Night.

**अञ्जी** [ अञ्जि, वा ङीप् ] 1 A blessing, auspicious desire. -2 A pounding machine ( पेषणयन्त्रम् ).

**अञ्जीरः-रम्** [ अञ्ज्-बाहु० ईरन्; perhaps a Persian word ] A species of the fig-tree and its fruit. ( Mar. अंजीर ).

**अट्** 1 P. ( rarely A. ) ( अटति, आट, अटितुम्, अटित ). To wander or roam about ( with loc. ); roam over ( sometimes with acc. ); भो बटो भिक्षामट Sk. go to beg alms; आट नैकटिकाश्रमान् Bk. 4. 12; महीमटन् Dk. 38 *-desid.* अटिटिषति; *-freq.* अटाट्यते to wander about habitually, as a religious mendicant.

**अट** *a.* Wandering; क्षपाटः a night-roamer. ततः क्षपाटैः पृथुपिङ्गलाक्षैः खमानशे Bk 2. 30.

**अटनम्** Wandering, roaming; भिक्षा°, रात्रि° &c.

**अटनिः-नी** *f.* [ अटति मौर्वीम्; अट्-अनि वा ङीप् ] The notched extremity of a bow; सुमनसो नमयन्नटनी धनुः N. 4. 96; निन्यतुः स्थलनिवेशिताटनी लीलयैव धनुषी अधिज्यताम् R. 11. 14.

**अटा** [ अट् वा अङ् ] The habit of roaming about ( as a religious mendicant ); so अट्या, अटाट्या.

**अटल** *a.* [ न. त. ] Firm, steady, solid.

**अटरु-रू-षः** ( Ety. doubtful ) N. of a very useful medicinal plant, the shrub वासक Justicia Adhatoda, or Adhatoda Vasaka ( Mar. अडुळसा ).

**अटविः-वी** *f.* [ अटन्ति चरमे वयसि मृगयाविहारार्थं वा यत्र; अट् अनि, वा ङीप् ] A forest, wood; अटवीतोऽटवीमाहिण्डमान; Ś. 2. विघ्नध्वान्तनिवारणैकसरणिर्विघ्नाटवीहव्यवाट् ।

**अटविकः** A forester = आटविकः q. v.

**अट्ट्** 1 A. 1 To kill. -2 To transgress, go beyond ( fig. also ). *-caus.* 1 To lessen, diminish. -2 To despise, condemn, disregard.

**अट्ट** *a.* [ अट्टयति अनाद्रियते अन्यत् यत्र; अट्ट्-घञ् ] 1 High, lofty; loud. -2 Frequent, constant (in comp). -3 Dried, dry. **-ट्टः-ट्टम्** [ आधारे घञ् ] 1 An apartment on the roof of upper story, a garret. -2 cf. अट्टं भित्तिचतुष्के स्यात्क्षामेऽत्यर्थे गृहान्तरे । Nm. A turret, buttress, tower ; गोपुर° उत्तुङ्गसौधसुरमन्दिरगोपुराट्टसंघट्ट... ॥ Māl. 9. 1; नरेन्द्रमार्गाट्ट इव R. 6. 67, 16. 11. न सन्त्यट्टास्तथा चास्य न ह्यस्ति परिखा तथा । अतो न दुर्गमं दुर्गमयो जानीत सैनिकाः ॥ Śiva. B. 13. 78. -3 A marketplace, market (probably for हट्ट). -4 A fine linen cloth. -5 A palace, palatial building. -6 Killing, injuring. -7 Excess, superiority. **-ट्टम्** Food, boiled rice; अट्टशूला जनपदाः Mb. ( अट्टं अन्नं शूलं विक्रेयं येषां ते Nīlakantha ) **-Comp. -अट्टहासः** very loud laughter. **-स्थली** [ अट्टप्रधाना स्थली शाक. त. ] a place or country full of palaces &c. **-हासः, -हसितम्, -हास्यम्** [ कर्म० ] a loud or boisterous laughter, a horse-laugh, cachinnation, usually of Śiva ; त्र्यम्बकस्य Me. 58; गिरिश° Dk. 1. **-हासिन्** [ अट्टं हसति-हस्-णिनि ] 1 N. of Śiva. -2 one who laughs very loudly. **-हासकः** [ अट्टहासेन कायते; कै-क ] N. of a plant ( कुन्द ) Jasminum Multiflorum or Hirsutum ( शुभ्रपुष्पत्वाच्छुभ्रहासतुल्यता ).

**अट्टकः** An apartment on the roof of a house; a palace also.

**अट्टट्ट** *ind.* [ अट्टोऽनादरः अट्टप्रकारः अट्टस्य गुणवाचितया द्वित्वं शकन्ध्वा० पररूपम् Tv. ] Very loud.

**अट्टनम्** [ अट्टयते अनाद्रियते रिपुरनेन, अट्ट् करणे ल्युट् ] A weapon shaped like a discus ( चक्राकारफलकास्त्रम् ). **-नम्** [ भावे ल्युट् ] Disregard.

**अट्टाट्टः** [ अट्टट्टवत् न पररूपम् ] 1 Overbearing conduct, contempt, disdain. -2 Excess, superiority.

**अट्टालः-लकः** ( अट्ट इव अलति पर्याप्तो भवति, अल्-अच् स्वार्थे कन् ] 1 An apartment on the roof, an upper storey; a palace; साट्टाट्टालकगोपुरा Mb. 3. 15. 6; Śi. 12. 65. सर्वतोभद्रं नामाट्टालकमारुह्य Mv. 6. -2 A tower. विष्कम्भचतुरश्रमट्टालकम् Kau. A. 1. 3.

**अट्टाल** *a.* High, lofty.

**अट्टालिका** [ अट्टाल, स्वार्थे कन् ] 1 A palace, a lofty mansion, a house of two or more storeys. cf. Māna. -2 N. of a country. **-Comp. -कारः** [ उपपद त. ] a mason, a bricklayer ( one who builds royal mansions; कुल्टायां च शूद्रायां चित्रकारस्य वीर्यतः । भवेदट्टालिकाकारः पतितो जारदोषतः ). **-बन्धः** [ ष. त. ] a kind of base or foundation in architecture; °न्धं बद्धः P. III. 4. 42.